# नागेशकौण्डभट्टदृष्ट्या समासशक्तिविमर्शः

**कुमारखतिवडाः**

*उपप्राध्यापकः, ने.सं.वि., वि.पी.विद्यापीठम्, सोलुखुम्बुः*

kumarsir750@gmail.com

**शोधसारः**

*नागेशभट्टविरचितो मञ्जूषाग्रन्थः कौण्डभट्टविरचितो भूषणसारग्रन्थश्चार्थग्रन्थौ स्तः। वैयाकरणसिद्धान्तानां प्रदर्शकावन्यतमौ ग्रन्थौ चैतौ मन्येते। एतयोर्व्याकरणसम्बद्धानेकविषयानां प्रतिपादनं विहितं दृश्यते। तत्र समासशक्तिविषयकविचारश्चात्यन्तं महत्त्वपूर्णो विद्यते। पूर्वोक्तग्रन्थेषु समासशक्तिसम्बन्धे विभिन्नवादा आपतिताः सन्ति, तेषां प्रतिवादेन निराकरणं कृत्वा समासशक्तिस्वीकरणं नागेशकौण्डभट्टाभ्यां विहितं दृश्यते। अत एव समासशक्तिस्वीकरणं किमर्थमावश्यकम् ? अस्वीकारे का बाधा ? नैयायिकमीमांसकवादाश्च के ? कथं तेषां निराकरणम् ? इत्यादिप्रश्नानां नागेशकौण्डभट्टाभ्यां स्वग्रन्थेषु समुचितमुत्तरं प्रदत्तं दृश्यते। अतः तयोर्मतानां तुलनात्मकाध्ययनेन साम्यत्ववैषम्यत्वनिरूपणपूर्वकं समासशक्तिविमर्शः कृतोऽस्ति। अत्र समासशक्तिसम्बन्धे महाभाष्यस्य, वाक्यपदीयग्रन्थस्य साहाय्यं तथान्यग्रन्थस्य साहाय्यं गृहीतं वर्तते।*

**शब्दबीजानि**

एकार्थीभावः, वृत्तिधर्मः, व्यधिकरणम्, व्यपेक्षा, शक्तिः।

## विषयपरिचयः

लौकिकसाहित्ये वैदिकसाहित्ये च व्याकरणशास्त्रस्य महत्त्वमपरिहार्यं दृश्यते। व्याकरणं विना शब्दानुशासनं न भवतीति शब्दानुशासको ग्रन्थश्च वैयाकरणग्रन्थ इत्यभिधीयते। व्याकरणशास्त्रस्य मुख्यं प्रयोजनं शब्दानुशासनमस्ति। परन्तु व्याकरणशास्त्रेऽपि शब्दब्रह्मसमासशक्तिस्फोटवादादयोऽनेके सिद्धान्ताः सन्ति। व्याकरणस्य सिद्धान्ताश्चात्यन्तं महत्त्वपूर्णा विराजन्ते। शब्दग्रन्थार्थग्रन्थभेदेन व्याकरणं द्विधा विभक्तं दृश्यते। तत्रार्थग्रन्थेषु मञ्जूषाभूषणसारग्रन्थौ चात्यन्तं महत्त्वपूर्णौ स्तः। तत्रापि समासशक्तिविषयकविचारश्चातीव गम्भीरविषयः। सामर्थ्यस्य समासस्य च विषये अत्र किञ्चिद्विविच्यते –

### सामर्थ्यपरिचयः

*समर्थः पदविधिः (अ. २/१/१)* इत्यत्र सूत्रे भाष्ये *सम्बद्धार्थः समर्थः, संसृष्टार्थः समर्थः,* (पतञ्जलिः, सन् १९९९, पृ. ३७) इति द्विविधविग्रहप्रदर्शनेन च सामर्थ्यं द्विविधमस्ति इति ज्ञायते। विधीयते योऽसौ विधिः, पदानां

विधिरिति पदविधिः, इति विग्रहाच्च पदोद्देश्यकविधिरेव पदविधिरस्ति इति ज्ञायते। सनाद्यन्तधातुविधायकस्य सूत्रस्य पदोद्देश्यकत्वाभावेऽपि पदसहचरितत्वेन वा सुप्तिङन्तं पदम् इति अस्वीकृत्य शक्तं पदम् इति स्वीक्रियते चेत् तस्यापि पदविधित्वं सिद्धं भवति। अतः समर्थपदस्य समर्थाश्रिते लक्षणां कृत्वा पदसम्बन्धी यो विधिः स समर्थाश्रितो भवति इत्यर्थः सम्पद्यते (भट्टोजिदीक्षितः, सन् २०१७, पृ. २)। समर्थस्य भावः सामर्थ्यम्। सामर्थ्यञ्च द्विविधमुक्तम्– एकार्थीभावरूपम्, व्यपेक्षारूपञ्च।

एकार्थीभावव्यपेक्षाविषये वार्तिककारः स्वीकरोति– *पृथगर्थानामेकार्थीभावः समर्थवचनम्, परस्परव्यपेक्षां सामर्थ्यमेके ।* (पतञ्जलिः, सन् १९९९, पृ. ३५) तत्र भाष्यकारोऽपि द्विविधं सामर्थ्यं समर्थयन् वदति– *एकार्थीभावो वा सामर्थ्यं स्याद् व्यपेक्षा वेति* (पतञ्जलिः, सन् १९९९, पृ. ४)। तत्त्वबोधिनीकारश्च स्वार्थपरिपूर्णानां पदानामाकांक्षादिद्वारान्वययोग्यता एव व्यपेक्षा, एकार्थीभावश्च समुदायशक्त्या विशिष्टैकार्थबोधकरूपः इति स्वीकरोति– *"तत्र स्वार्थपर्यवसायिनां पदानामाकांक्षादिवशाद्यः परस्परसम्बन्धः सा व्यपेक्षा। विशिष्टा अपेक्षा व्यपेक्षा। एकार्थीभावलक्षणसामर्थ्यं तु प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन पृथग् गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम्। संगतार्थः समर्थः संसृष्टार्थः समर्थ इति व्युत्पत्तेः।"* (भट्टोजिदीक्षितः, सन् २०१७, पृ. २) तथैव पदानामुपसर्जनत्वेन निरर्थकत्वेऽपि समुदायशक्त्या अर्थान्तराभिधायकत्वमेकार्थीभावे भवतीति कैयटः स्वीकरोति।

उपर्युक्तपरिभाषया एकार्थीभावसामर्थ्यं पञ्चसु समासादिवृत्तिषु भवति इति ज्ञायते, व्यपेक्षा च वाक्ये भवतीति ज्ञायते। एकार्थीभावेऽवयवस्य पृथगर्थवत्त्वं न भवति, समुदायस्यैवार्थवत्त्वं भवति। व्यपेक्षायां चोभयोरर्थवत्त्वेनाकाङ्क्षया परस्परमन्वयो भवति। यथा– राज्ञः पुरुष इत्यादिवाक्ये प्रत्येकं पदं परस्परं साकाङ्क्षं भवति। राजपदं पुरुषमाकांक्षते, पुरुषपदञ्च राजपदमाकाङ्क्षते। पुरुषोऽयं कस्य ? इत्यस्योत्तरे राज्ञ इति। राज्ञः कः ? इत्यत्र पुरुष इत्युत्तरं भवति। अत उभयोः परस्पराकाङ्क्षादर्शनेन विग्रहवाक्ये व्यपेक्षा भवतीति ज्ञायते। एकार्थीभावश्च समास एव। तदेवोक्तं भर्तृहरिणा–

*सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते।*
*वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते॥ (भट्टोजिदीक्षितः, सन् २०१७, पृ. २)*

यथा राजपुरुष इत्यत्र वृत्तौ। पृथगर्थानामेकार्थीभाव इति भाष्यप्रदीप उक्तम्। एकार्थीभावश्च विग्रहवाक्यस्थार्थस्य विशिष्टतया प्रक्रियादशायां पृथगर्थत्वैकार्थत्वरूपोऽस्ति। राज्ञः पुरुष इत्यत्र विग्रहवाक्ये पदद्वयाद् ज्ञातस्यार्थस्य समासे सति विशिष्टतया एकार्थीभावत्वेनैकार्थो बुध्यते चेत्तदेकार्थीभावरूपं सामर्थ्यमस्ति।

नैयायिकास्तु समासेऽपि व्यपेक्षापक्षं स्वीकुर्वन्ति। समासे विशिष्टशक्तिकल्पनेऽपि विग्रहवाक्यस्यैवार्थस्य बोधनेन गौरवात्, अतः समासादिष्वपि व्यपेक्षापक्ष एव ज्यायान्। तद्विपरीतं वैयाकरणाश्च- एकार्थीभावे संसृष्टार्थं समर्थम्, व्यपेक्षायां सङ्गतार्थः समर्थ इति भाष्यप्रयोगेण समासे एकार्थीभाव एव इति स्वीकुर्वन्ति, अन्यत्र वाक्येषु

व्यपेक्षापक्षं स्वीकुर्वन्ति। नागेशकौण्डभट्टादिविदुषां मते च भाष्यसम्मतमेकार्थीभावरूपं सामर्थ्यमेव समासे भवति। समर्थसूत्रे द्विविधस्य सामर्थ्यस्य वर्णनं कृत्वा समासे व्यपेक्षापक्षं दूषयित्वा एकार्थीभावस्य समर्थनमित्थं कृतम्– *अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसौ एकार्थीभावकृतो विशेषः स वक्तव्यः।* (पतञ्जलिः, सन् १९९९, पृ. ३८-३९) कौण्डभट्टेनापि उक्तम्– *पदे वर्णवत् वृत्तौ पदानामानर्थक्यम्* (कौण्डभट्टः, २०४५, पृ. १६६) इत्यर्थः। अतः समासे न व्यपेक्षा भवति।

**समासपरिचयः**

समुपसर्गपूर्वक– आस् (उपवेशने) इत्यस्माद्धातोः घञ्प्रत्यये सति समासशब्दस्य निष्पत्तिर्भवति। सम्यक्तया पदानां परस्परं सम्मेलनस्य एकीभावस्य च स्थितिः समास इत्यर्थः सम्पद्यते। समसनं समासः, स च सङ्क्षेपरूप इति कैश्चिदाचार्यैरुच्यते। यत्र एकार्थीभावाय पदद्वयं वा तदधिकं समस्यते सङ्क्षेपेण एकपदीभवति स समुदायः समासः-

*तत्र समासेति नामधेयबीजं तु व्यस्तानाम्। पदानां समसनं नाम एकीभावेनावस्थानम्॥ इति। (किशोराणि, सन् २०१०, पृ. ३८७)*

वैयाकरणभूषणसारस्य प्रभाटीकाकारेण समासस्य लक्षणमित्थं कृतम्– *पाणिन्यादिसङ्केतसम्बन्धेन समासपदवत्त्वम् समासत्वम्, एकार्थीभावापन्नसमुदायविशेषत्वं वा समासत्वम्* (किशोराणि, सन् २०१०, पृ. ३८७)। महर्षिपाणिनिना समासं परिभाषयितुं स्पष्टतया किमपि सूत्रं नोक्तं तथापि *समर्थः पदविधिः (२/१/१)* इति सूत्रेण समर्थस्य पदविधित्वमूहितम्। तत्र पदानां विधिः पदविधिः। स च समासकृत्तद्धितसनाद्यन्तैकशेषरूपः। समासस्यापि पदविधित्वेन विग्रहवाक्यार्थाभिधाने यः शक्तः स समास इति। शाब्दिकाश्च वदन्ति– समासप्रयोजनप्रसङ्गे ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वञ्च समासप्रयोजनमस्ति। समासे सति एकपदीभवनं, अनेकस्वराणामेकस्वरीभवनं, नानाविभक्तिकपदानाञ्च एकविभक्तीभवनं च दृश्यते, अत इदमेव समासप्रयोजनमस्ति। सारस्वतसम्प्रदायानुसारं समासघटकपदसमूहः समासे सत्यपि विभक्तिलोपे विभक्त्यर्थं न परित्यजति। अतस्तन्मते तु एकपदीभवनमेव समासः। केवलमेकपदीकरणार्थमेव समास आवश्यकः। तत्र सारस्वतव्याकरणे उक्तम्–

*विभक्तिर्लुप्यते यत्र तदर्थस्तु प्रतीयते।*
*ऐकपद्यं पदानाञ्च स समासोऽभिधीयते॥ (मिश्र, २०४५, पृ. ४१)*

सम्भवत एतत्पद्यानुसारेण नैयायिका अपि समासेऽपि व्यपेक्षापक्षमुररीकृत्य एकार्थीभावस्य समर्थनं नैव कुर्वन्ति। विभक्तिलोपेऽपि विभक्त्यर्थस्य भानेन विग्रहवाक्यस्थार्थस्यैव भानादर्थबोधः। केवलं पदानां योगकरणार्थमेव समासस्य आवश्यकता भवतीति स्वीकुर्वन्ति। पाणिनीयव्याकरणसम्मतं समासप्रयोजनमेते नैव स्वीकुर्वन्ति। परन्तु समासे एकपदीभवनमात्रं न भवति, अपि तु अनेकस्वराणामेकस्वरीभवनं तथा नानाविभक्तिकपदानामेकविभक्तीभवनं तथा अवयवस्य पृथगर्थराहित्येन समुदायस्यैवार्थवत्त्वं भवति। अर्थवतां समुदायोऽप्यनर्थकः भवितुं शक्नोति तस्मात् समासस्य एकार्थीभावे शक्तिः स्वीक्रियते।

**समासस्य भेदाः**

समासस्य भेदसम्बन्धेऽपि विदुषां विवादोऽस्ति। विग्रहः लौकिकालौकिकभेदेन द्विविधः। राज्ञः पुरूष इति लौकिकः, राजन् ङस् पुरूष सु इत्यलौकिकश्च। समासो नित्यानित्यभेदेनापि द्विधा। स्वपदविग्रहः, अस्वपदविग्रहश्च (भट्टोजिदीक्षितः, सन् २०१७, पृ. २१५)। तत्र प्रायेण अस्वपदविग्रहः नित्यसमासः। स्वपदविग्रहश्च अनित्यसमासः। यथा कुम्भं करोतीति कुम्भकार इति नित्यसमासः। कृष्णं श्रित इति कृष्णश्रित इत्यनित्यसमास इत्यपि भेदोऽस्ति। परन्तु इतोऽपि विशिष्य सिद्धान्तकौमुद्यां प्रकरणानुसारेण समासस्य चातुर्विध्यं प्रदर्शितम्– अव्ययीभाव–तत्पुरुष–बहुव्रीहि–द्वन्द्वभेदेन। तच्च प्रायिकमेव। प्राचीनवैयाकरणानां मतेन समासस्य चातुर्विध्येऽपि भाष्ये सह सुपा इति सूत्रस्य योगविभागेन विभिन्नानां समस्यानां समाधानेन समासः षट्प्रकारकोऽस्तीति कौण्डभट्टः स्वीकरोति। शब्दकौस्तुभे दीक्षितेनापि विस्तरेण लिखितं वर्तते, तथैव सिद्धान्तकौमुद्यामपि (भट्टोजिदीक्षितः, सन् २०१७, पृ. ४)। इति स्वीकृत्य कौण्डभट्टः समासशक्तिप्रकरणे श्लोकमुद्धरति –

*समासस्तु चतुर्धेति प्रायोवादस्तथा परः।*

चातुर्विध्यमपि तु षड्विधत्वं स्वीकरोति कौण्डभट्टः समासशक्तिनिर्णयस्य प्रारम्भे –

*सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा।*
*सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः। (कौण्डभट्टः, २०४५, पृ. १५८)*

षट्प्रकारकः समासो भवतीति ज्ञायते, षड्विधत्वे भाष्योक्तानां सर्वेषामपि उदाहरणानां संग्रहो भवति। अत एतत्स्वीकार्यम्। अस्योदाहरणञ्च इत्थं प्रदर्श्यते–

***सुपां सुपा***

अस्मिन् समासे पदद्वयं सुबन्तं भवति। यथा राजपुरुष इत्यादिः। अत्र राज्ञः पुरुष इति विग्रहे षष्ठी (अष्टा. २/२/८) इत्यनेन षष्ठीसमासे राजपुरुषः इत्यस्य सिद्धिर्भवति। तथैव कृष्णं श्रितः इति कृष्णश्रितः, *द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः (अष्टा. २/१/२४)* इत्यनेन समासः। यूपाय दारु यूपदारु, अत्र *चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः(अष्टा. २/१/३६)* इत्यनेन समासः। इत्यादिः।

***सुपां तिङा***

सुबन्तस्य तिङन्तेन सह समासो भवति। यथा परि अभूषयत् इति पर्यभूषयत्। अनु व्यचलत् इति अनुव्यचलत्। परि–अनु एतयोः सुबन्तयोः, अभूषयत्, व्यचलद् इत्याभ्यां तिङन्ताभ्यां सह *गतिमतोदात्तवता तिङापि समासः* (कौण्डभट्टः, २०४५, पृ. १५८) इति वार्तिकात् समासो भवति।

***सुपां नाम्ना***

सुबन्तस्य नामपदेन (प्रातिपदिकेन) सह समासो भवति। यथा कुम्भं करोतीति कुम्भकारः। *उपपदमतिङ् (अष्टा. २/२/१९)* इति सूत्रेण समासः। अत्र *गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः* (भट्टोजिदीक्षितः, सन्

२०१७, पृ. १००) इति परिभाषया सुबुत्पत्तेः प्राक्कारशब्देन समासो भवति। पूर्वपदस्य कुम्भ इत्यस्य च सुबुत्पत्तिर्भवत्येव। अन्यथा चर्मक्रीती इत्यादौ चर्मन्नित्यस्य नकारस्य लोपानापत्तेः समासात्पूर्वं सुबुत्पत्तेरभावेन प्रातिपदिकान्तनकाराभावात्।

### *सुपां धातुना*

सुबन्तस्य धातुना समासो भवति। अत्र उत्तरपदं धातुमात्रं भवति। *क्विब्वचिप्रच्छयायतस्तुकटप्रुजूश्रीणां दीर्घश्च* (कौण्डभट्टः, २०४५, पृ. १५९) इति वार्तिकात् समासः। कटं प्रवते इति कटप्रूः इति, आयतं स्तौतीति आयतस्तूः इत्यादिः। आयतम्, कटम् इति द्वितीयान्तसुबन्तस्य स्तु, प्रु इत्याभ्यां धातुभ्यां सह समासोऽत्र दृश्यते।

### *तिङां तिङा*

तिङन्तस्य तिङन्तेन सह समासो भवति। पिबत खादत इत्येवं व्यवहारो यस्यां क्रियायां सा पिबतखादता। पचत भृज्जत इत्येवं व्यवहारो यस्यां क्रियायां सा पचतभृज्जता। अत्र सर्वत्र *आख्यातमाख्यातेन क्रियासातत्ये* (कौण्डभट्टः, २०४५, पृ. ८६) इति गणसूत्रेण समासो भवति। पिबत, खादत, पचत, भृज्जत इत्यादीनि सर्वाण्यपि पदान्यत्र तिङन्तानि सन्ति।

### *तिङां सुबन्तेन*

तिङन्तस्य सुबन्तेन सह समासो भवति। स्तम्बं जहि इति आभीक्ष्णेन य आह स जहिस्तम्बः। *जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारञ्चाभिदधाति* (कौण्डभट्टः, २०४५, पृ. ८६) इति गणसूत्रेण समासः। अत्र जहिजोडः, जहिस्तम्बः इत्यादौ एकं तिङन्तं पदमस्ति चेत् अन्यत् सुबन्तं पदमस्ति।

उपर्युक्त षट्प्रकारकः समासः सह सुपा इति सूत्रस्य योगविभागेन कृतोऽस्ति। इदञ्च शब्दकौस्तुभे विस्तरश उक्तमस्ति। तदेव कौण्डभट्टेन भूषणकारेऽपि उक्तम्। अतः समासः षड्विधः इत्यत्रैव कौण्डभट्टानां सम्मतिः।

## शोधसमस्याः

भूषणसारमञ्जूषाग्रन्थप्रतिपादितविषयाणां मध्ये समासशक्तिविषये समासशक्तिस्थापनमेव मुख्या समस्या वर्तते। अत एव अनया समस्यया सह सम्बद्धाः समस्याः प्रमुखाः सन्ति-

क) समासशक्तिविषये वैयाकरणमतं किम् ?

ख) कौण्डभट्टनागेशयोः समासशक्तिविषयकः विचारश्च कः ?

## शोधोद्देश्यम्

शोधसमस्यायां लिखितानां समस्यानां समाधानमेव प्रस्तुतशोधकार्यस्य मुख्यमुद्देश्यमस्ति। अस्य शोधकार्यस्य मुख्योद्देश्यानि अधोदर्शितरीत्या विभक्तुं शक्यन्ते-

क) समासशक्तिविषये वैयाकरणमतस्थापनम्।

ख) नागेशकौण्डभट्टाभिमतसमासशक्तिविमर्शः।

## सैद्धान्तिकावधारणा

वैयाकरणशास्त्रे निहितान् सिद्धान्तान् प्रकटयितुं भूषणसारमञ्जूषादिग्रन्था निर्मिता ज्ञायन्ते। अत एव व्याकरणशास्त्रस्य त्रिमुनिसंक्षिप्तगदितसिद्धान्तान् व्यापकीकृत्यार्थग्रन्था विरचिताः। अत्र मञ्जूषाभूषणसारादिग्रन्थे च स्फोटवादः, शक्तिविचारः, निपातार्थविचारः, समासशक्तिविचार इत्यादिवादाश्च सन्ति। एतेषां वादानां प्रादुर्भावश्च त्रिमुनिगदितसूत्रवृत्तिभाष्यवचनेनैव। यथा पाणिनिना *वर्तमाने लट् (अ. ३/२/१२३)* इति सूत्रकरणेन लड्लकारार्थत्वं वर्तमानत्वम्, उत लड्द्योतकार्थत्वं वर्तमानत्वमिति सिद्धं भवति। इत्थं वादानां जन्म भवति।

समासशक्तिसन्दर्भेऽपि महाभाष्यकृता *समर्थः पदविधिः (अ. २/१/१)* इति सूत्रव्याख्यायां *सम्बद्धार्थः समर्थः, संसृष्टार्थः समर्थः* इति विग्रहद्वयं कृतं दृश्यते (पतञ्जलिः, सन् १९९९, पृ. ३७)। अत एकार्थीभाव-व्यपेक्षाभेदेन सामर्थ्यद्वयं ज्ञायते। व्यपेक्षात्मकसामर्थ्यञ्च वाक्येषु तिष्ठति, एकार्थीभावात्मकसामर्थ्यञ्च वृत्तौ तिष्ठति। कृत्तद्धितसमाससनाद्यन्तधातुरूपाः पञ्च वृत्तयः सन्ति। नैयायिकमीमांसकादयश्च समासेऽपि व्यपेक्षां स्वीकुर्वन्ति। राज्ञः पुरुषः इतिवत् राजपुरुष इत्यस्यापि समानार्थत्वेन समुदायशक्तिमस्वीकृत्यावयवार्थकल्पनां कुर्वन्ति। व्यपेक्षापक्षं दूषयितुं नागेशकौण्डभट्टौ च भाष्यसम्बद्धस्वमतेन व्यपेक्षापक्षं दूषयित्वा एकार्थीभावपक्षं स्थिरीकुर्वतः। अतः समासे समुदायशक्तिकल्पना आवश्यकी, अस्वीकारे च महद्गौरवमिति वैयाकरणद्वयमतं विश्लिष्टं वर्तते।

## अध्ययनविधिः

प्रस्तुतं शोधकार्यं मुख्यतो तुलनात्मकविधिना विहितमस्ति। एवञ्च विश्लेषणविधिरपि स्वीकृतो वर्तते।

## सामग्रीसङ्कलनविधिः

प्रस्तुतशोधकार्यसम्पादनाय पुस्तकालयविधिना मञ्जूषाभूषणसारग्रन्थानां प्राथमिकसामग्रीरूपेण तथा मूलग्रन्थटीकादीनां द्वैतीयिकसामग्रीरूपेण सङ्कलनं कृतं विद्यते, तथा च महाभाष्यवाक्यपदीयादिग्रन्थाश्च सहायकसामग्रीरूपेण प्रयुक्ता विद्यन्ते।

## व्यपेक्षावादिमतप्रदर्शनम्

मीमांसकनैयायिकादयो व्यपेक्षावादिनः समासादिवृत्तावपि व्यपेक्षारूपं सामर्थ्यं स्वीकुर्वन्ति। समासादिष्वपि अवयवार्थद्वारा बोधो भवति, समुदायशक्तिकल्पनस्यावश्यकता नास्ति। अवयवशक्तिस्वीकृते वाक्ये व्यपेक्षा, समासादिषु एकार्थीभाव इति पक्षद्वयस्य समर्थने गौरवात्। यतो हि राज्ञः पुरुषः इति वाक्याद् यः शाब्दबोधो जायते

समासादपि तादृशस्यैव बोधेन न समुदाये शक्तिः। अवयवस्यैवार्थवत्त्वात्। समुदाये शक्तिकल्पने गौरवात्। तर्हि राजपुरुषः इत्यत्र कथं राजसम्बन्ध्यभिन्नः पुरुषः इति बोधः ? इत्यत्र प्रश्ने ते कथयन्ति– अत्र राजपदादेः राजसम्बन्धिनि लक्षणया तस्य च अभेदेन पुरुषपदार्थे अन्वयेन राजसम्बन्ध्यभिन्नः पुरुषः इति बोधो भवति।

राजपुरुषः इत्यत्र च राजपदार्थः राजसम्बन्धिनि शक्तत्वेन तत्र ऋद्धस्य इत्यादेर्नान्वयो भवितुं शक्नोति। *पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन* इत्युक्तेः। तथैव यदि ऋद्धस्य इत्यस्य योगः क्रियते तदा ऋद्धस्य राज्ञः पुरुषः इत्येव भवति। न तत्र समासो भवति, *सविशेषाणां वृत्तिर्न* इति वचनात्। राजपुरुषः इति समाससम्पन्ने तु ऋद्धस्य इत्यस्य अन्वयो न भवति *वृत्तस्य च विशेषणयोगो न इति नियमात्* (नागेशः, सन् २००६, पृ. २०९)।

यत्र शक्त्या कार्यं न भवति तत्रापि लक्षणया कार्यं कर्तुं शक्यते। घनश्यामः इत्यादौ व्यपेक्षापक्षस्वीकृतेऽपि न दोषः। तत्र घनशब्दस्य घन इव इत्यर्थे लक्षणा कर्तव्या। ततश्च घनसदृशश्यामः इत्यर्थो बोधो भवति। न तत्र सदृशार्थबोधाय इवादीनां प्रयोगः, घनशब्देन घनसदृशस्यार्थबोधाद् उक्तार्थानामप्रयोग इति न्यायात्। तथैव धवखदिरौ इत्यत्र धवश्च खदिरश्च इति विग्रहे समासे सति समुच्चयार्थबोधाय चकारस्य न प्रयोगः, तत्रापि धवस्य धवसमुच्चये लक्षणा स्वीकारात्।

तथैव विभाषया समासविधायकस्य सूत्रस्य *विभाषा* इत्यस्य च आवश्यकता नास्ति। राजपुरुष इत्यादौ राजसम्बन्ध्यभिन्नः पुरुष इति बुबोधयिषायां लक्षणया समासस्य प्रयोगो भवति, राजसम्बन्धवान् इति बुबोधयिषायाञ्च विग्रहस्य प्रयोगो भवतीति न दोषः। एवञ्च सर्वत्र समासे समस्तप्रयोगेच्छायां समस्तपदप्रयोगो भवति, वाक्यप्रयोगे च वाक्यस्य प्रयोगो भवतीति विभाषा सूत्रस्य नास्त्यावश्यकतेति लाघवमेव।

पङ्कजशब्देऽपि अवयवशक्त्या पङ्कोत्पन्नस्य बोधो भवति, लक्षणया च पद्मस्य बोधो भवति। अतः अवयवशक्तावेव लक्षणया पद्मस्य बोधः स्वीकर्तव्यः।

व्यपेक्षापक्षस्वीकृतेऽपि अषष्ठ्यर्थबहुब्रीहौ लक्षणाया असम्भवस्तु न भवति, यथा प्राप्तमुदकं यं सः प्राप्तोदकः ग्रामः। इत्यत्र उदकपदे एव लक्षणास्वीकारात् (कौण्डभट्टः, २०४५, पृ. १८७)। प्राप्तपदे किमर्थं लक्षणा न कृता ? इति प्रश्ने तु तस्य प्र + आप् + क्तः इति प्रकृतिप्रत्ययविभागशक्यत्वेन यौगिकत्वात् धातुप्रत्ययतदर्थज्ञाने सति एव साध्यतया विलम्बितत्वेन तत्र न लक्षणा भवति। अतः उत्तरपदे एव लक्षणा कर्तव्या। तथैव प्राप्तोदकः इत्यत्र सुप्प्रत्ययस्य सामीप्ये उदकपदमेवास्ति। *प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वम्* (कौण्डभट्टः, २०४५, पृ. १८७) इति व्युत्पत्तेरनुरोधेन च उदकपदे एव लक्षणा कर्तुमुचिता।

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रादनन्तरं कृत्तद्धितसमासाश्च इति सूत्रमस्ति। अतः तत्र समासग्रहणाद् समासस्यानर्थकस्यापि प्रातिपदिकसंज्ञा भवति इति। अनर्थकत्वेऽपि समासस्य प्रातिपदिकत्वं भवति, अन्यथा समासपदमेव नोच्चारयेत्, उच्चारितः अत एव उच्चारणसामर्थ्यात् नास्ति समासे प्रातिपदिकसंज्ञाया दोष इति।

यथा निपातानामनर्थकत्वेऽपि प्रातिपदिकत्वं सम्भवति तद्वत् समासस्यापि अनर्थकत्वेऽपि प्रातिपदिकत्वसिद्धौ बाधकाभावः। अतिप्प्रातिपदिकम् इत्येवोच्यमाने सति तिङन्तसुबन्तभिन्नस्य शब्दस्वरूपस्य प्रातिपदिकसंज्ञा भवति, समासस्यापि अतिप्प्रातिपदिकम् इत्यनेन प्रातिपदिकत्वे सिद्धे समासश्च इति सूत्रेण नियम्यते। यदि समुदायस्य प्रातिपदिकसंज्ञा तर्हि समासस्यैव इति। अतो न दोषः।

स्वरे कर्तव्ये च एकार्थीभावपक्षे दोषो दृश्यते। समर्थः पदविधिः इति सूत्रस्थं सामर्थ्यं यद्येकार्थीभावात्मकं स्यात्तदा *सुबामन्त्रिते पराङ्गवत्स्वरे* (अष्टा.२/१/२) इति सूत्रेऽपि समर्थः पदविधि इत्यतः समर्थपदानुवृत्या *द्रवत्पाणी शुभस्पती* इत्यत्र *सुबामन्त्रिते०* इत्युक्तसूत्रस्य प्रवृत्तिर्न स्यात्, एकार्थीभावसामर्थ्यस्य तत्रादृष्टत्वात्। अत्र च व्यपेक्षात्मकसामर्थ्यस्य दृष्टत्वात्। एकार्थीभावस्वीकारे सति सूत्रासङ्गतिदर्शनेन व्यपेक्षात्मकसामर्थ्यमेव ग्रहीतव्यम्। यदि सामर्थ्यस्य द्विविधत्वं प्रसिद्धमेव अतोऽन्यत्रैकार्थीभावात्मकं सामर्थ्यं स्वरे कर्तव्ये तु व्यपेक्षात्मकं सामर्थ्यं गृह्यताम् इति तु वक्तुं न शक्यम्, अर्धजरतीयस्यानौचित्यात्। अतः सर्वत्र व्यपेक्षात्मकं सामर्थ्यमेव स्वीकर्तव्यं समासादिषु पृथक् न एकार्थीभावात्मकं सामर्थ्यमिति सिद्धं भवति।

### एकार्थीभावस्य स्वीकारे वैयाकरणमतम्

समासे अर्थवतां शब्दानां सम्मिश्रणेनार्थवतां समुदायः सार्थक अतो व्यपेक्षापक्षेणैव कार्यं चलतीति व्यपेक्षावादिनामाशयः। परन्तु अर्थवतां समुदायोऽपि अनर्थको भवति। यथा अर्थवत्सूत्रे भाष्ये– *अर्थवदिति किम् ? अर्थवतां समुदायोऽनर्थकः दश दाडिमानि षडपूपाः कुण्डमजाजिनम्* (नागेशः, सन् २००६, पृ. २१२) इति प्रत्युदाहृतम्। अस्मिन् पक्षे सूत्रकारश्च *समर्थः पदविधिः* इति सूत्रं कथयति। तस्यैव व्याख्याने वार्तिककारः सामर्थ्यद्वयं स्वीकरोति– *पृथगर्थानामेकार्थीभावः समर्थवचनम्, परस्परव्यपेक्षां सामर्थ्यमेके*। (पतञ्जलिः, सन् १९९९, पृ. ३५) अत्र एकार्थीभावात्मकमेकं सामर्थ्यञ्चेत् व्यपेक्षात्मकमेकमिति स्पष्टीभवति। तत्र भाष्यकारोऽपि द्विविधं सामर्थ्यं समर्थयन् वदति–*एकार्थीभावो वा सामर्थ्यं स्याद् व्यपेक्षा वेति* (पतञ्जलिः, सन् १९९९, पृ. ४)। तत्त्वबोधिनीकारश्च एकार्थीभावं व्यपेक्षां च परिभाषयन् आह–

तत्र स्वार्थपर्यवसायिनां पदानामाकाङ्क्षादिवशाद्यः परस्परसम्बन्धः सा व्यपेक्षा। विशिष्टा अपेक्षा व्यपेक्षा (भट्टोजिदीक्षितः, सन् २०१७, पृ. २)। कैयटेनापि उक्तम्– यत्र पदान्युपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि वा प्रधानार्थोपादानाद् व्यर्थान्यर्थान्तराभिधायीनि वा स एकार्थीभावः। परस्पराकाङ्क्षारूपा व्यपेक्षा (कैयटः, सन् १९९९, पृ. ४-५)।

तथैव पक्षद्वयमुपस्थाप्य पतञ्जलिना समर्थः पदविधि इति सूत्रभाष्ये उक्तम्– *अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्यः* (पतञ्जलिः, सन् १९९९, पृ. ३८)।

भाष्यकारवचनेन समासादिवृत्तौ एकार्थीभावस्य समर्थनं भर्तृहरिकैयटदीक्षितकौण्डभट्टनागेशभट्टादिवैयाकरणैः कृतम्। इदमेव प्रमाणमस्ति। तत्र एकार्थीभावस्य समर्थनाय नागेशभट्टः लघुशब्देन्दुशेखरे एकार्थीभावस्य व्याख्यानं करोति– *स च विशेष्यविशेषणभावावगाह्युपस्थितिजनकत्वम्। संसृष्टार्थं समर्थम् इति भाष्योक्तेः।* (नागेशः, लघुशब्देन्दुशेखरः, सन् २००६, पृ. ८२३) अत एव समासे एकार्थीभावात्मकसामर्थ्यं भवति इति ज्ञायते।

## नागेशकौण्डभट्टदृष्ट्या समासशक्तिविमर्शः

व्यपेक्षावादिभिर्नैयायिकमीमांसकैः *समर्थः पदविधि* इति सूत्रस्थसमर्थग्रहणेन समासेऽपि विग्रहगतवाक्यार्थाभिन्नत्वेनार्थबोधदर्शनात् व्यपेक्षा एव सामर्थ्यमिति स्वीक्रियते। अवयवशक्तिकल्पनया सम्भवे समुदायशक्तिकल्पनमनुचितम् इति। परन्तु नागेशकौण्डभट्टौ च समास एकार्थीभावात्मकं सामर्थ्यमस्ति इति स्वीकुर्वतः। प्रमाणरूपेण भाष्यस्थं *संसृष्टार्थः समर्थः, सङ्गतार्थः समर्थः* (नागेशः, लघुशब्देन्दुशेखरः, सन् २००६, पृ. ८२३) इति विग्रहद्वयमुदाहरतः। तथैव भाष्यकारेणापि समर्थसूत्रे *अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्यः* (पतञ्जलिः, सन् १९९९, पृ. ३८) इत्युक्तम्। एतद्वचनेन च समासादिवृत्तिषु एकार्थीभावस्य समर्थनं भाष्यकृता कृतं लभ्यते।

तत्र भूषणसारलघुमञ्जूषयोर्व्यपेक्षावादिनां मतमपि प्रदर्शितं वर्तते। तत्र तेषां मतं प्रदर्श्य दीक्षितकारिकया स्वमतं प्रदर्शयति कौण्डभट्टः। तथैव नागेशोऽपि तथैव कौण्डभट्टस्यानुसरणं करोति, परन्तु किञ्चित्स्थले नागेशकौण्डभट्टयोर्मतभेदो दृश्यते। रथन्तरसप्तपर्णशुश्रूषादिष्ववयवार्थस्य किञ्चिदप्यदर्शनेन समासादिवृत्तिषु एकार्थीभाव एव भवतीति नागेशाशयः (नागेशः, परमलघुमञ्जूषा, सन् २००६, पृ. २०७)। नागेशेन च समासशक्तिनिरूपस्य प्रारम्भ एव परमलघुमञ्जूषायां जहत्स्वार्थाजहत्वार्थाभेदेन वृत्तेर्द्वैविध्यं प्रदर्शितम्।। जहत्स्वार्थाजहत्स्वार्थौ चैकार्थीभावस्य भेदौ स्त इति भाष्यसम्मतं सिद्धान्तं प्रदर्शयति। तत्र नागेशमतेन जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था इति, न जहति पदानि स्वार्थं यस्यां सा अजहत्स्वार्था। राज्ञः पुरुषो राजपुरुष इत्यत्र समासेऽपि राजपदस्य पुरुषपदस्य चार्थबोधेनैकार्थीभावस्य राजसम्बन्ध्यभिन्नः पुरुष इत्यस्य बोधो भवतीत्यत्र अजहत्स्वार्था भवति। तथैव रथन्तरं साम, शुश्रूषा सेवा, इत्यत्र च रथन्तरशब्देन समुदायशक्त्यावयवार्थाद्विलक्षणार्थबोधदर्शनेन जहत्स्वार्था वृत्तिरस्तीति ज्ञायते। तथैव शुश्रूषा इत्यस्मात् सेवाऽर्थः प्रतीयते, अत्राप्यवयवार्थस्याननुभवदर्शनेन जहत्स्वार्था वृत्तिरस्ति इति ज्ञायत इति नागेश उदाहरणप्रदर्शनेन कथयति।

कौण्डभट्टस्य मतभेदः किञ्चिद् दृश्यतेऽत्र स च यद्यपि जहत्स्वार्थाजहत्स्वार्थाभेदेन वृत्तेर्द्वैविध्यमपि स्वीकरोति परन्तु जहत्स्वार्था वृत्तिरेव समासे भवति, सा च एकार्थीभावात्मिका एव। अजहत्स्वार्था इत्यस्यापरं नाम च व्यपेक्षा एवास्ति, सा न समासेऽस्ति इति वदति (कौण्डभट्टः, २०४५, पृ. १६६)। अतः समासे सर्वथा जहत्स्वार्थावृत्तिरेव स्वीकरोति कौण्डभट्ट इति ज्ञायते।

कौण्डभट्टश्च राजपुरुष इत्यादावपि यथा यावकः, वृषभ इत्यादौ वृष, याव इति पदानां निरर्थकत्वं भवति तद्वदत्रापि समासेऽवयवो निरर्थक इति (कौण्डभट्टः, २०४५, पृ. १६७) स्वीकरोति। नागेशश्च राजपुरुष इत्यत्रावयवार्थञ्चाङ्गीकरोति। सर्वत्र जहत्स्वार्था वृत्तिर्न स्वीक्रियते अपि तु यत्र रूढिः शक्तिरवयवार्थस्य विरोधिनी भवति तत्रैव जहत्स्वार्था वृत्तिः स्वीक्रियते इति नागेशमतम् (नागेशः, लघुशब्देन्दुशेखरः, सन् २००६, पृ. ८२५)। अत एव राजपुरुषपदेऽपि राजपुरुषपदयोरर्थस्य परित्यागः कर्तुं न शक्यत इति अवयवार्थस्यापि भानं भवति, परन्तु प्रत्येकमवयवस्यार्थस्य भानं समासे न भवति अपि तु समुदायादेव भानसम्भवेन समुदायशक्तिर्भवति, स एव एकार्थीभावः। राजपुरुष इत्यत्रस्थं पदद्वयञ्च राजविशिष्टपुरुषबोधने सहायकमेव एकार्थीभावश्च समुदायशक्त्यैव इति नागेशस्य तात्पर्यम्। स च कौण्डभट्टस्यापि मतं खण्डयति। जहत्स्वार्था इत्यस्य नाम एकार्थीभावः, अजहत्स्वार्था इति च व्यपेक्षा इति यदुक्तं कौण्डभट्टेन तन्न समीचीनम्। भाष्यदर्शनेन एकार्थीभावस्यैव भेदद्वये प्रमाणदर्शनादिति (नागेशः, वैयाकरणसिद्धान्तलघुमञ्जूषा, २०४६, पृ. १४०९)।

इत्थं जहत्स्वार्थाजहत्स्वार्थभेदे नागेशकौण्डभट्टयोर्मतभेददर्शनेऽपि अन्यत्र सर्वत्र तुल्यत्वेन नागेशः स्वमतपुष्टये कौण्डभट्टस्य वचनोच्चारणेन च समासे शक्तिरस्ति इति पक्षम् एव द्रढीयति। अतः समुदायशक्तिसन्दर्भे वैयाकरणोभयस्य मतं चैकार्थीभावात्मकमस्ति। चैकार्थीभावस्य समर्थनाय व्यपेक्षावादिनां मतखण्डनाय च वैयाकरणद्वयेन स्वे स्वे ग्रन्थे पूर्वं व्यपेक्षावादिनां मतं प्रस्तुत्य खण्डनं कृतम्, अतोऽत्रोभयोर्मतविवेचनं क्रियते।

समासे अवयवस्यार्थो न भवति इत्यस्याभिप्रायः सर्वथा निरर्थक इति न वाच्यम्। अन्यथा निरर्थकत्वे सति समासान्तप्रत्ययात्वादीनामसिद्धिः स्यात्। रामादिपदघटितरेफादिवर्णानां पदे यथा निरर्थकत्वं तद्वत् समासेऽपि पदानां पृथगर्थबोधे निरर्थकत्वं भवति। परन्तु वृत्तिघटकेषु पदेष्वर्थवच्छब्दनिमित्तकं कार्यन्तु प्राग्भाविनमेकार्थीभावमर्थमादाय भवति। अतो राजाश्व इत्यादीनां राजन् इत्यस्य नान्तप्रातिपदिकत्वेन *नलोपः प्रातिपदिकान्तस्य (अष्टा. ८/२/७)* इत्यनेन नलोपसिद्धिर्भवति। तथैव सुपन्थाः, महाबाहु इत्यादावपि यथायथमात्वादयो भवन्ति। तस्मादजहत्स्वार्थावृत्तिषु अवयवस्यार्थस्यापि भानं भवति, समुदायशक्त्या च समष्टिबोधो भवतीति। पृथक्पृथग्भानाभावेऽपि प्राग्भाविनमेकार्थीभावमादाय विग्रहावस्थायामेवार्थवत्त्वेन समासो भवति ततश्च प्रातिपदिकश्च सिद्ध्यति। अत्र प्रत्ययोत्तरपदयोश्च इत्यादिशास्त्रप्रामाण्येन उत्तरपदे परे त्वाद्यादेशकरणेन प्राग्भाविनमर्थमादाय अर्थवच्छब्दनिमित्तकं कार्यं भवतीति ज्ञायते। अतः समासेऽवयवो निरर्थक इत्यपि वक्तुं शक्यते।

व्यपेक्षावादिनो राजपुरुष इत्यत्र राजपदस्य राजसम्बन्धिनि लक्षणां स्वीकुर्वन्ति। तथा च राजसम्बन्धी इत्यस्य पुरुषेण सहाभेदान्वयबोधे सति राजसम्बन्ध्यभिन्नः पुरुष इति बोधमङ्गीकुर्वन्ति। अत्र व्यपेक्षामतखण्डने नागेशकौण्डभट्टयोर्मतसाम्यं वर्तते। व्यपेक्षामतखण्डनाय वैयाकरणमतेनात्र उच्यते- अवयवशक्त्यात्र लाघवं न भवति, न तु लक्षणया बुभुत्सितार्थलाभो भवति। राजपुरुष इत्यत्र राजपदस्य लक्षणया राजसम्बन्ध्यर्थस्वीकृते पुरुषपदार्थेन सह तस्याभेदान्वयः कृतस्तथैव तत्र ऋद्धस्य इत्यादिविशेषणायोगाय वृत्तस्य च विशेषणयोगो न, इति उक्तम्। तदपि

एकार्थीभावस्यैव समर्थनमस्ति। यतो हि एकार्थीभावस्वीकृते वृत्तावयवमात्रस्यार्थो न भवति, अतो राजपुरुष इत्यत्रापि ऋद्धस्य इति विशेषणान्वयो भवितुं न शक्नोति। राजपुरुष इत्यस्यैव पदार्थत्वात् राजमात्रस्य पदार्थैकदेशत्वात् *पदार्थः पदार्थेन०* इति नियमेन विशेषणान्वयो भवितुं न शक्नोति। वैयाकरणमते ऋद्धस्य इत्यस्य योगवारणाय *वृत्तस्य च विशेषणयोगो न* इति वचनस्यापूर्वत्वेन स्वीकारस्यावश्यकता न भवति, यथा नैयायिकमते भवति। तथैव ऋद्धस्य राज्ञः पुरुषः इत्यत्र समासाकरणाय नैयायिकैर्यथा *सविशेषाणां वृत्तिर्न* इत्यपूर्वरूपेण वचनं कथनीयं भवति, तदपि वैयाकरणमतस्वीकारेऽनावश्यकम्, तत्तु फलितार्थकथनमेव। अतो लाघवञ्चास्मिन्नेव मते दृश्यते इति नागेशकौण्डभट्टयोर्विचारः (नागेशः, परमलघुमञ्जूषा, सन् २००६, पृ. २२२)।

कौण्डभट्टोऽत्र स्वमतेन नैयायिकमतं खण्डयति। भाष्यकारेण *इह केचित् पूर्वपदार्थप्रधानः०* इत्यादिकथनेन न समग्राणां पूर्वपदार्थप्रधानत्वमव्ययीभावत्वमुक्तम्। तथैव अन्येषामपि प्रधानत्वञ्च प्रायेण प्रधानत्वमुक्तमतः *सह सुपा* इति योगविभागेन भाष्ये षड्विधप्रकारेण समासस्य भेददर्शनात् चतुर्विधः समास इति प्रायोवादोऽस्ति। चतुर्विधत्वे भूतपूर्वः, आयतस्तूः, पचतभृज्जता इत्यादीनामसङ्ग्रहात्। तथैव पूर्वपदार्थप्रधानत्वादिलक्षणञ्च रेखागवयवदवास्तविकं वर्तते।

कौण्डभट्टनागेशौ चात्र व्यपेक्षावादिमतखण्डनाय पङ्कजशब्दवत् समासे भिन्नैव शक्तिरस्तीति स्वीकुर्वतः। पङ्कजशब्दे नैयायिकैरपि समुदायशक्तिकल्पना कृता एव तत्रावयवशक्तिकल्पनया चाशक्यत्वात्। तत्रावयवशक्त्या पङ्कोत्पन्न इति बोधे सति लक्षणया पद्मस्य बोधो भवतीति समुदायशक्तिकल्पना न क्रियते इत्यपि न वक्तुं शक्यम्। अवयवशक्तिस्वीकर्तॄणामवयवस्यार्थवत्त्वेऽपि समष्टिसमुदायस्यानर्थकत्वेन लक्षणाऽपि कर्तुमशक्यत्वात्। यदि लक्षणाकरणेऽपि समुदायशक्तिकल्पनस्यावश्यकत्वात् यतो हि अषष्ठ्यर्थबहुव्रीहौ प्राप्तोदकः इत्यादौ चावयवशक्तिकल्पनया बुभुत्सितार्थलाभाभावे सति समुदायशक्तिकल्पना कर्तव्या एव, लक्षणा क्रियते चेत्तत्रापि समुदायशक्तिकल्पना आवश्यकी भवति। अतः समासे अवयवशक्तेर्भिन्नैव समुदायशक्तिर्वर्तते।

चित्रगुरित्यत्र गोशब्दे लक्षणयैव स्वाम्यर्थप्रतीतिर्भवति इत्युच्यते तर्हि पङ्कजशब्देऽपि लक्षणा स्यादत उभयत्र तुल्यत्वेन एकस्यैव स्वीकारे विनिगमनाभावात् समुदायशक्तिः स्वीकार्या। एवमेव मीमांसकस्वीकृते रथकारपदेऽपि विना समुदायशक्तिमर्थबोधो न भवति।

अत्र नागेशकौण्डभट्टाभ्यां व्यपेक्षामतखण्डनायानेकानि उदाहरणानि आदाय प्रस्तूयन्ते। अत्र उभाभ्यां श्लोकः प्रदर्श्यते-

*समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।*
*बहूनां वृत्तिधर्माणां वचनैरेव साधने।*
*स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः॥ (नागेशः, परमलघुमञ्जूषा, सन् २००६, पृ. २२१) / (कौण्डभट्टः, २०४५, पृ. १७०)।*

नैयायिकैश्च *विभाषा* इति सूत्रस्यावश्यकता नास्ति इत्युक्तं तन्न समीचीनम्। व्यपेक्षावादिनामपि तस्यावश्यकत्वात्। यतो हि राजपुरुषः वा राज्ञः पुरुष इत्यत्र उभयोरवयवार्थस्य तुल्यत्वदर्शनेन ऋद्धस्य राज्ञः पुरुष इत्यत्रापि समासः प्राप्तो भवति, तथैव राजपुरुष इत्यत्रापि राजपदस्याप्यर्थवत्त्वेन ऋद्धस्य इति विशेषणान्वयः प्राप्तो भवति, तद्वारणार्थं *विभाषा* इति सूत्रमपि स्वीकर्तव्यं भवति, *वृत्तस्य च विशेषणयोगो न, सविशेषाणां वृत्तिर्न* इत्यादीनि वचनानि च अपूर्वत्वेन स्वीकरणीयानि। एकार्थीभावानुयायिनान्तु सविशेषणस्य वृत्तिर्न भवति, सापेक्षत्वेन सापेक्षमसमर्थवत् इति नियमात्, तथैव राजपुरुष इत्यादौ विशेषणयोगश्च न भवति तत्र राजपदार्थस्यानर्थकत्वेन एकदेशत्वेन *पदार्थः पदार्थेन०* इति न्यायविरोधात्। अत एव व्यपेक्षापक्षमुद्भाव्य भाष्यकारेण एकार्थीभावस्य विशेषता वक्तव्या इत्येवंरूपं वचनमुक्तम् (पतञ्जलिः, सन् १९९९, पृ. ३८)। एतेन एकार्थीभावस्य समर्थनं कृत्वा व्यपेक्षायाश्च गौरवत्वेन वृत्तौ परित्यागः कृत इति बुध्यते।

घनश्याम इत्यादौ व्यपेक्षास्वीकारे नागेशकौण्डभट्टौ न समुत्सुकौ। अत्राप्युभयमतेन व्यपेक्षापक्ष एव खण्डितो भवति। व्यपेक्षायां घनश्याम इत्यत्र लक्षणां कृत्वा घनसदृशकरणेन *उक्तार्थानामप्रयोग* इति नियमेन इवपदप्रयोगवारणमपि गौरवमेवास्ति। तथैव धवखदिरौ छिन्धि इत्यत्रापि समुच्चयार्थबोधाय चकारस्य प्रयोगे प्राप्ते सति तन्निवारणार्थं धवस्य धवसमुच्चये लक्षणायाः करणमपि गौरवमेव। अत्र व्यपेक्षापक्षे स्वीकृते चकारादिनिषेध इति दोषमात्रं न अपि तु अनेका दोषा आपतन्तीति ताभ्यामुक्तम्। अत्र दोषाः प्रदर्श्यन्ते-

*चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्।*
*कर्तव्यन्ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः॥ (कौण्डभट्टः, २०४५, पृ. १७६)*

अतः पूर्वोक्तानां घनश्यामः, धवखदिरौ छिन्धि, घृतघटः इत्यादीनां प्रयोगाणां सिद्धये तत्र इवादीनां प्रयोगवारणाय उक्तार्थानामप्रयोगः इति वचनस्यापूर्वरूपेण कल्पना व्यपेक्षापक्षे कर्तव्या। वैयाकरणानान्तु न्यायसिद्धमिदं समासे एकार्थीभावस्यैव मुख्यत्वेनावयवार्थस्य निरर्थकत्वान्न वचनस्यावश्यकतास्ति। तथैव व्यपेक्षापक्षे बहुव्युत्पत्तिभञ्जनञ्चास्ति। सर्वत्र लक्षणा कर्तुं न शक्यत एव। इति न्यायविरोधात्।। स्वीकर्तव्या, यतो हि *प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वम्* (कौण्डभट्टः, २०४५, पृ. १८३) इति व्युत्पत्तेः चरमपदस्यैव प्रत्ययसन्निहितत्वादिति वाच्यम्, यदि चरमपदस्यैव प्रत्ययेन सह योगस्तर्हि बहुब्रीहिसमासस्यैवाभावापत्तिः स्यात्। *अनेकमन्यपदार्थे (अष्टा. २/२/२४)* इत्यनेन अनेकप्रथमान्तस्य पदस्यान्यपदार्थे समासविधानात्। यदि च घटादिपदानां यथा चरमवर्णे मीमांसकम्मन्यैः शक्तिः स्वीक्रियते तद्वत् बहुब्रीहावपि चरमपद एव लक्षणा क्रियते पूर्वपूर्वपदानान्तु तात्पर्यग्राहकत्वम् इत्युच्यते तर्हि घटपदादीनां चरमवर्णस्याकारस्योच्चारणेन घटस्यार्थस्य लाभः स्यात्, तथैव अत्रापि तुल्यन्यायात् उदक इत्युच्चारणेन उदककर्तृकप्राप्तिकर्मको ग्रामः इत्यर्थलाभः स्यात् किमर्थं समासकरणेन ? इति व्यपेक्षापक्षे दोष एव स्यादिति कौण्डभट्टस्याशयः (कौण्डभट्टः, २०४५, पृ. १८४)।

चित्रगुः, प्राप्तोदक इत्यादौ लक्षणास्वीकरणे कौण्डभट्टः नागेशश्च न सहमतौ स्तः। प्रत्ययानां व्युत्पत्तिः सन्निहितपदार्थगतस्वार्थबोधकत्वं नास्ति अपितु *प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्* अस्ति अतः नैयायिकोक्तं प्रत्ययस्य लक्षणं न स्वीक्रियते। उपकुम्भम्, अर्धपिप्पली इत्यादौ प्रत्ययस्यान्वयः पूर्वपदार्थे एव दर्शनेन नैयायिकोक्तलक्षणस्याव्याप्तिदोषग्रस्तत्वान्न तत्स्वीकार्यम्। कुम्भस्य समीपम्, अर्धं पिप्पल्याः इति विग्रहे कृते समीपार्धपदार्थस्यैव प्राधान्येन तत्रैव विभक्तेरन्वयेन नैयायिकलक्षणस्य व्यभिचारात्। नागेशकौण्डभट्टरीत्या तु विशिष्टस्यैवार्थवत्त्वेन प्रकृतित्वात् *प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्* (भट्टाचार्य, सन् २००१, पृ. ८५) इति व्युत्पत्तेर्न कुत्रापि दोषो भवति।

व्यपेक्षापक्षस्वीकृते प्राप्तोदकः इत्यत्र च उदकपदे लक्षणा क्रियते चेत्तदपि नाभीप्सितार्थलाभो भवति, अनेकव्युत्पत्तिभञ्जनं भवति। उदकस्य उदकसम्बन्धिनि लक्षणा क्रियते चेत् प्राप्तिकर्त्रभिन्नोदकसम्बन्धी ग्रामः इत्यर्थबोधो भवति। अत्र उदकस्य च उदकसम्बन्धिन एकदेशत्वेन *पदार्थः पदार्थेनान्वेति०* इति व्युत्पत्तिभञ्जनञ्च भवति। यदि प्राप्तिकर्त्रभिन्नोदकम् इति बोधोत्तरं उदकस्य उदकसम्बन्धिनि लक्षणा तदापि उदककर्तृकप्राप्तिकर्मको ग्रामः इत्यभीष्टार्थलाभो न सम्भवति इति दोषः।

तथैव नात्र प्राप्तोदक इत्यत्राभीप्सार्थलाभाभावेऽपि सर्वत्राषष्ठ्यर्थबहुव्रीहौ लक्षणया कार्यं न चलति तथा च अनेकव्युत्पत्तिकल्पना, अनेकस्वीकृतव्युत्पत्तिभञ्जनं च भवतीति गौरवमेव भवति। ऊढरथः, उपहृतपशुः, उद्धृतौदना, बहुपाचिका इत्यादिभ्यो व्यपेक्षापक्षे क्रमशो यदनडुहादिकर्तृकोद्वहनकर्मको रथः, रुद्राद्युदेश्यकोपहरणकर्मकः पशुः, स्थाल्याद्यवधिकोद्धरणकर्मक ओदनः, शालाद्यधिकरणपाकभावनाश्रया बहव इत्यादिकानां रथपश्वोदनपाचकादितत्तदर्थविशेष्यकबोधो भवति, परन्तु अनुभूतशाब्दबोधस्य लाभो न भवति। एकार्थीभावस्वीकर्तॄणान्तु क्रमशः रथकर्मकवहनकर्ता अनड्वान्, पशुकर्मकोपहारोद्देश्यो रुद्रः, ओदनकर्मकोद्धारणावधिः स्थाली, बहुपाककर्त्रधिकरणं नगरी इत्याद्यभीप्सितार्थस्य बोधेन व्यपेक्षावादिभिरपि बहुव्रीहौ अगत्या समुदायशक्तिकल्पना अवश्यमेव कर्तव्या भवति।

नैयायिकानां व्यपेक्षापक्षेऽनर्थकस्यापि समासस्य प्रातिपदिकत्वकरणे अत्रोच्यते कौण्डभट्टेन- *अतिप्रातिपदिकम्* इति सूत्रयितुं न शक्यते, यदि सूत्र्यते तर्हि तत्राप्यर्थवत्पदं देयं भवति, तथैव अपाणिनीयत्वेन दोषोऽपि भवति। अनर्थकस्यापि प्रातिपदिकत्वं तर्हि धनम्, वनम्, इत्यादौ नलोपादयश्च स्युरिति दोषः। यदि फलाभावान्न प्रातिपदिकत्वमित्युच्यते तदपि न समीचीनम्। कृत्तद्धितसमासाश्च इत्युत्तरसूत्रेऽनुवृत्यर्थं यथार्थवत् पदमावश्यकं भवति तद्वदत्रापि अर्थवत्पदमावश्यकं भवति। प्रातिपदिकसंज्ञारूपकार्यमेवार्थवत्त्वमनुमापयति। यथा पर्वतो वह्निमान् धूमात् इत्यत्र धूमो यथा बह्निमनुमापयति तद्वत्। समासस्यापि अर्थवत्त्वमवश्यमेव भवितव्यम् इति सिद्धान्तः स्थिरीभवति। तच्च समुदायशक्तिस्वीकाराभावे न सम्भवति। अतः समासस्य प्रातिपदिकसंज्ञाकरणार्थं समुदायशक्तिस्वीकार आवश्यको भवति। व्यपेक्षापक्षे च समुदायशक्तिस्वीकाराभावे समस्तप्रयोगविलयापत्तिरेव भविष्यति।

अत्र नागेशोऽपि कौण्डभट्टस्यानुसरणं करोति। नागेशश्च यथा धूम वह्निमनुमापयति तद्वत् प्रातिपदिकसंज्ञाकार्यमेवार्थवत्त्वमनुमापयति इत्यत्रानुमानस्वरूपमपि दर्शयति। यथा *समासोऽर्थवान् प्रातिपदिकत्वात्, यन्नार्थवत् तन्न प्रातिपदिकम्, अभेदविवक्षापक्षे भू सत्तायामित्याद्यनुकरणवदिति* (नागेशः, परमलघुमञ्जूषा, सन् २००६, पृ. २१४)। अत्र नागेशेन समासरूपे पक्षे प्रातिपदिकत्वहेतुना अर्थवत्त्वं संसाधितं वर्तते। अतः यत्र यत्र धूमस्तत्र तत्र वह्निः इति साहचर्यनियमो भवति तद्वत् यत्र यत्र प्रातिपदिकसंज्ञाकार्यं तत्र तत्र अर्थवत्त्वं भवतीति साहचर्यनियमोऽस्ति। तस्मात् प्रातिपदिककार्येऽर्थवत्त्वेन पदेन भवितव्यमिति निश्चीयते। अत्र व्यतिरेकिदृष्टान्तश्च दर्शितो वर्तते। यत्र यत्रार्थवत्त्वाभावः तत्र तत्र प्रातिपदिकत्वाभावः इति यथा भू सत्तायाम् इत्यत्रानुकरणत्वेनाभेदविवक्षायामर्थवत्त्वाभावेन प्रातिपदिकत्वाभावस्तद्वत् इति ज्ञापनार्थं दृष्टान्तमपि दर्शितम्।

नैयायिकाः वदन्ति - व्यपेक्षापक्षं स्थिरीकर्तुं लक्षणयैव कार्यं सिद्ध्यति अतः विवरणविरोधश्च न भवति। यतो हि विग्रहवाक्यार्थाभिधाने समर्थ एव समास इति स्वीकृतो वर्तते। राजपुरुषः इत्यत्र च राजपदार्थस्य राजसम्बन्धिनि लक्षणायां समासेऽपि विग्रहस्यार्थबोधो भवति, एवमेव सर्वत्र लक्षणा भवति। विवरणविरोधश्च भवतां वैयाकरणानां मत एव दृश्यते, पचतीति पाचकः, व्याकरणमधीते वैयाकरणः इत्यत्र विवरणविव्रियमाणयोर्विरोध एवास्ति। तस्मात्समुदायशक्तिर्नैव स्वीकार्या।

अत्र नागेशमतेनोच्यते- राजपुरुषः इत्यत्र राजपदस्य राजसम्बन्धे वा राजसम्बन्धिनि वा कुत्र लक्षणा ? यदि राजसम्बन्धे लक्षणा क्रियते तर्हि राजसम्बन्धवान् पुरुष इति बोधो न स्यात्, राजसम्बन्धस्य नामार्थतया तस्य पुरुषपदार्थेन सममभेदान्वयबोधे राजसम्बन्धरूपः पुरुष इति बोधश्च स्यात्। यदि राजसम्बन्धिनि लक्षणा तर्हि राज्ञः पुरुष इति विवरणविरोधः स्यात्, विवरणे सम्बन्धार्थस्य बोधे सति लक्षणया सम्बन्ध्यर्थबोधे समाससमानार्थकवाक्यस्य विग्रहत्वम् इति वचनविरोधः स्यात्। तस्माल्लक्षणयापि दोषस्योद्धारः कर्तुं न शक्यते नैयायिकैः। अस्माकन्तु विशिष्टस्यैवार्थवत्त्वेन विग्रहसमानार्थकसमास इति दर्शनान्न दोषः। वैयाकरणः, पाचक इत्यादौ च व्याकरणमधीते, पचतीति इत्यत्र च तिङन्तस्य दर्शनेन धात्वर्थमुख्यविशेष्यकत्वेन *भावप्रधानमाख्यातम्* (नागेशः, परमलघुमञ्जूषा, सन् २००६, पृ. ५६) इति यास्कवचनात् भावनामुख्यविशेष्यकबोधेन विशेष्यविशेषणयोः विपर्ययो दृष्टः, तथैव पाचक इत्यत्र च *प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यम्* (नागेशः, परमलघुमञ्जूषा, सन् २००६, पृ. ७१) इति नियमात् प्रत्ययार्थस्य प्राधान्यं दृष्टमतः किञ्चित्पार्थक्यं दृष्टं परन्तु नैयायिकरीत्या सर्वत्र विरोधस्तु न दृष्टः-

*आख्यातं तद्धितकृतोर्यत्किञ्चिदुपदर्शकम्।*
*गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः॥ (नागेशः, परमलघुमञ्जूषा, सन् २००६, पृ. २१७)*

अतः यत्किञ्चिदुपदर्शकत्वेन वैयाकरणमतस्य स्वीकार आवश्यकः। अत्र कौण्डभट्टश्च नवीनमुदाहरणं दत्त्वा स्पष्टयति- अत एव आख्यातपदं तद्धितकृतोर्यत्किञ्चिद् उपदर्शकमेव। कुम्भकारः, आक्षिकः इत्यत्र च कुम्भोत्पत्त्यनुकूलव्यापाराश्रयः, अक्षकरणकव्यापाराश्रयः इति बोधो भवति। कुम्भं करोतीति अक्षैर्दीव्यतीति विग्रहे च

कुम्भोत्पत्त्यनुकूला भावना, अक्षकरणिका देवनानुकूला भावना इति च बोधो भवति। कृत्प्रत्यये कारकाणां विशेष्यत्वम्, आख्याते च भावनायाः प्राधान्यं दृष्टं परन्तु तन्न दोषाय भवति।

मीमांसकाः समुदायशक्तिस्वीकर्तॄणां मते दोषं प्रदर्शयितुं निषादस्थपत्यधिकरणमानयन्ति। अत्र मीमांसकमते *निषादस्थपतिं याजयेत्* इति श्रौतवाक्यात् निषादस्थपतिपदे निषादानां स्थपतिरिरिति षष्ठीतत्पुरुषो, निषादश्चासौ स्थपतिरिरिति कर्मधारयो वा निषादः स्थपतिर्यस्य सः इत्याकारक बहुब्रीहिर्वा इति सन्देहो वर्तते। तत्र मीमांसकमतानुसारेण च बहुब्रीहौ अन्यपदार्थप्रधानत्वेन उत्तरपदे लक्षणया गौरवात् न स्वीकार्या। तथैव षष्ठीतत्पुरुषेऽपि निषादपदार्थस्य पुरुषे भेदेनान्वयासम्भवात्, निषादसम्बन्धिनि लक्षणा आवश्यकी भवति, अतो गौरवमेव। तस्मात् कर्मधारय एव स्वीक्रियते। निषादश्चासौ स्थपतिरिरिति अत्र लक्षणाया अनावश्यकत्वेन च लाघवमेवास्ति। अस्मिन्नधिकरणे सङ्गतिश्च अवयवशक्तिं स्वीकृत्यैव भवति, न तु समुदायशक्तिं स्वीकृत्य सम्भवोऽस्ति।

अत्रोच्यते कौण्डभट्टेन- निषादस्थपत्यधिकरणासिद्धिर्न भवति वैयाकरणमते। यद्यपि समासे एकैव शक्तिर्भवति सर्वत्र। अतः निषादस्थपतिशब्देऽपि सर्वत्र एकस्या एव शक्तेः सत्त्वात् कुत्र लक्षणा कर्तव्या, कुत्र चालक्षणा इति निर्णयकरणाय सन्देहो न भवति, एकार्थीभावस्वीकर्तॄणां मतेऽपि विग्रहस्थपदानां शक्तिग्रहेऽन्तरङ्गबहिरङ्गत्वचिन्तनं भवति, तदा अन्तरङ्गस्य कार्यस्य बलवत्त्वेन तत्कार्यमेव क्रियते। अस्मिन्सन्दर्भे अनेकविधसमासानां प्राप्तिर्भवति, तदा अन्तरङ्गवशात् कर्मधारयसमास एव स्वीक्रियत अतो न दोषः। यतो हि *निषादानां स्थपतिरिरिति* विग्रहे निषादस्य निषादसम्बन्धिनि लक्षणां कृत्वा निषादसम्बन्धिब्राह्मणादिना यज्ञं कुर्यात् इत्यर्थः बोद्धुं शक्यते। *निषादः स्थपतिर्यस्य* इति विग्रहेण निषादस्वामिकेण ब्राह्मणादिना अपि यज्ञं कारयितुं शक्यते। तथैव *निषादश्चासौ स्थपतिः* इति विग्रहेण निषादरूपस्वामिना यज्ञं कारयितुमपि शक्यते। अत्र सन्देहे बहुब्रीहेस्तत्पुरूषस्य च लक्षणया च गौरवात् कर्मधारय एव स्वीक्रियते। यद्यपि कर्मधारयस्वीकृते *स्त्रीशूद्रौ नाधीयाताम्* इति श्रुतिवाक्यस्योल्लङ्घनं भवितुं शक्नोति, परन्तु यज्ञस्थमन्त्राणां शूद्रादावपि पठनमात्रस्याधिकारप्रदानेनात्र लक्षणाकरणस्य च लाघवेन फलमुखगौरवं न दोषाय भवतीति स्वीक्रियते। यथा मीमांसकैः *नानार्थे तात्पर्याद् विशेषावगतिः* (कौण्डभट्टः, २०४५, पृ. २०२) इति स्वीक्रियते तद्वत् वैयाकरणैरपि विग्रहस्थवाक्यानां शक्त्या अन्तरङ्गत्वबहिरङ्गत्वचिन्तनेन लाघवगौरवचर्चा क्रियते। अत एव समासेऽपि तात्पर्यद्वारैव विशेषनिर्णयः कर्तव्यः तदा समुदायशक्तपक्षेऽपि निषादस्थपत्यधिकरणस्य सिद्धिदर्शनेन तत्पक्षस्यैवाङ्गीकारस्य युक्तत्वात्।

**निष्कर्षः**

समर्थसूत्रव्याख्यानक्रमे भाष्यकृतोभयविधसामर्थ्यस्य व्याख्यानात् व्यपेक्षैकार्थीभावयोरूभयोः समासादिवृत्त्यर्थे कतरः श्रेयस्कर इति लाघवगौरवमादायैव व्यपेक्षैकार्थीभावस्वीकर्तॄणां मतभेदो वर्तते। नैयायिकमीमांसकैरवयवशक्तिं परिकल्प्य समासादिषु कुत्रचित् पूर्वपदे लक्षणा, कुत्रचिदुत्तरपदे लक्षणा च क्रियते, मीमांसकैश्च समुदाये लक्षणा क्रियते, वैयाकरणाश्च समुदायशक्तिस्वीकारे लक्षणाया अनावश्यकत्वेन लाघवात् एकार्थीभावात्मकं सामर्थ्यं समासे स्वीकुर्वन्ति।

तथैव समासस्यापि प्रातिपदिकसंज्ञार्थमवश्यमेव समुदायशक्तिकल्पना कर्तव्या भवति, तथैव सर्वत्र लक्ष्ये समासादिवृत्तिषु एकार्थीभावात्मकं सामर्थ्यं स्वीकर्तुमुचितम् इति नागेशकौण्डभट्टयोश्च विचारः।

व्यपेक्षावादीनां सारांशश्च- अवयवशक्तिं परिकल्प्य राजपुरुष इत्यादौ समासे राजपदस्य राजसम्बन्धिनि लक्षणा भवति, तस्य च पुरुषपदार्थेऽभेदान्वयो भवति, अतो वैयाकरणस्वीकृतार्थस्य लाभोऽवयवशक्तिकल्पनेऽपि भवतीति अवयवशक्तिकल्पना एव ज्यायसी इति। *समुदायशक्त्या रहितस्य समासस्य प्रातिपदिकत्वं न सम्भवति, अर्थवत्त्वाभावात्, प्रत्येकमवयवस्यार्थवत्त्वेऽपि समुदायस्यानर्थकत्वात्* इति वैयाकरणाक्षेपविघाताय चानर्थकस्य समासस्य च प्रातिपदिकत्वसम्पादनाय अतिप्रातिपदिकम्, समासश्च इति द्विविधसूत्रस्वीकरणं कृतमस्ति नैयायिकैः। तत्रानर्थकस्यापि वाक्यस्य समासस्य च प्रातिपदिकत्वप्राप्तौ समासश्च इत्यनेन नियमकरणात् अनर्थकस्य पदसङ्घातस्य प्रातिपदिकत्वं चेत् समासस्यैव भवतीति ज्ञायत एव इति।

वैयाकणमतेन विमृश्यते चेल्लक्षणया समुदायशक्तिपरित्यागेन च निर्वाहः कर्तुं न शक्यते। राजपुरुषः इत्यादौ च लक्षणया कार्यसम्भवेऽपि चित्रगुरित्यादौ लक्षणाया अशक्यत्वेन तन्न स्वीकर्तुं शक्यते। एकपदे लक्षणाकरणे विनिगमकाभावात् उभयपदे लक्षणापत्तौ चित्रस्वामी, गोस्वामी इति जाते बोधावृत्तिप्रसङ्गश्च भवति, यदि गोपदे एव लक्षणा भवति इति तत्र सम्बन्ध एव विनिगमकोस्ति इत्युच्यते चेत् चित्रगुरित्यस्मात् चित्रपदार्थस्य गोपदार्थस्य चाभेदान्वयो न सम्भवति पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन इति न्यायात् गो इत्यस्य पदार्थैकदेशत्वात्। तथैव प्राप्तोदकः इत्याद्यषष्ठबहुव्रीहावपि अनेकव्युत्पत्तिकल्पना च कर्तव्या भवति। प्राप्तोदकः इत्यस्मादनुभूयमानः उदककर्तृकप्राप्तिकर्मको ग्रामः इति नैयायिकादीनां मते कदापि लक्षणया सम्भवो न भवति, यदि उदकस्य कर्तृत्वेन प्राप्तावन्वयः क्रियते चेत् नामार्थधात्वर्थयोः साक्षाद्भेदान्वयो न सम्भवति, तथैव क्तप्रत्ययस्य प्राप्तौ विशेषणं कृत्वा प्राप्तेः विशेष्यत्वमपि कर्तुं न शक्यते, प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यम्, इति नियमभङ्गापत्तेः। घनश्यामः, धवखदिरौ इत्यादौ च घनसदृशश्याम इति बोधनाय तथा च धवखदिरसमुच्चय इति बोधनाय च घनस्य घनसदृशे लक्षणां कुर्वन्ति तथैव धवखदिरौ इत्यत्र च धवस्य धवसमुच्चये लक्षणां कृत्वा निर्वाहो भवतीति समुदायशक्तिकल्पनाया अनावश्यकत्वं प्रतिपाद्यते नैयायिकैः। लक्षणया अत्र कार्ये कृते गौरवं भवति सर्वत्र लक्षणा क्रियते चेत् तत्रैव गौरवम्। अतो व्यपेक्षापक्षे चकारादिनिषेधो दोषश्च दृष्टः। तथैव समस्तप्रयोगेच्छायां समासस्य, विग्रहवाक्यस्य प्रयोगेच्छायां वाक्यस्य च प्रयोगसम्भवात् व्यपेक्षापक्षे विभाषा इति सूत्रस्यावश्यकता नास्तीति नैयायिकैरुक्तं तदपि समीचीनं न प्रतीयते। एतत्सूत्रस्य सामर्थ्योभयस्मिन् आवश्यकत्वदर्शनेन व्यपेक्षापक्षः स्वीकर्तुं न शक्यते। कुत्र एकार्थीभावो नित्यो भवति ? कुत्र चानित्यः ? इति ज्ञानस्य सर्वेषामभावेन तत्सूत्रस्वीकारस्यावश्यकत्वात्। यतो हि कुम्भं करोतीति कुम्भकारः, गां ददातीति गोदः, इत्यादौ च कुम्भकारस्य स्थाने विग्रहवाक्यप्रयोगे समग्रार्थदर्शनाभावेन एकार्थीभावो नित्यो भवति, यद्यत्र विभाषा इति सूत्रं न स्यात्तर्हि अत्रापि विभाषया एकार्थीभावः स्यात्तदानर्थकं स्यादतो विभाषा इत्यस्यावश्यकत्वं दृश्यते। समासे पङ्कजशब्दवत् शक्तिश्च भवति, पङ्कजशब्दे समुदायशक्तिमन्तरा पद्मस्य बोधः कर्तुं न शक्यते तद्वत् समासेऽपि अवयवशक्त्या इष्टार्थस्य बोधः कर्तुं न शक्यते। अजहत्स्वार्थवृत्तावपि राजपुरुष इत्यादौ च समुदायशक्तिर्भवति, अवयवस्य तत्र पृथगर्थाभावेन निरर्थकत्वात्। समुदायशक्तिस्वीकार एव समासस्यापि प्रातिपदिकत्वसंभवाच्च। एतावता नैयायिकमीमांसकानां व्यपेक्षापक्षश्च खण्डितो भवति, मञ्जूषाभूषणसारयोश्च एकार्थीभावस्यैव नागेशकौण्डभट्टाभ्यां समर्थनेन भाष्यकारादेश्च व्यपेक्षापक्षस्य दूषणेन च समासे एकार्थीभावस्यैवोपयुक्तत्वं दृश्यते। समासशक्तिस्वीकरणमेवोचितम्।

## कृतज्ञता

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञेभ्यो गुरुभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दिकीं कृतज्ञतां व्यनज्मि।

## सन्दर्भग्रन्थसूची

किशोराणि प्रकाशचन्द्र ए.. (सन् २०१०). *नागेशभट्टका व्याकरणदर्शन चिन्तन*. जयपुर: हंसा प्रकाशन.

कैयटः. (सन् १९९९). "महाभाष्यप्रदीपः". पतञ्जलिः, तथा गुरुप्रसाद शास्त्री (सं.) इत्यत्र, *महाभाष्यम्*. दिल्ली: प्रतिभा प्रकाशन.

कौण्डभट्टः. (२०४५). *वैयाकरणभूषणसारः*. (आद्याप्रसाद मिश्र, अनु.) वाराणसी: सम्पूर्णानन्दविश्वविद्यालयः.

नागेशः. (२०४६). *वैयाकरणसिद्धान्तलघुमञ्जूषा*. (माधवराज शास्त्री, नरहरि शास्त्री, अन्य, अनु.) वाराणसी: चौखम्बा संस्कृत सिरीज.

नागेशः. (सन् २००६). *परमलघुमञ्जूषा*. (वंशीधर मिश्र, अनु.) वाराणसी: चौखम्बा सुरभारती प्रकाशन.

नागेशः. (सन् २००६). *लघुशब्देन्दुशेखरः*. (वैकुण्ठनाथ शास्त्री, अनु.) वाराणसी: चौखम्बा सुरभारती प्रकाशन.

पतञ्जलिः. (सन् १९९९). *महाभाष्यम्* (संस्क. द्वितीय). (गुरुप्रसाद शास्त्री, सं.) दिल्ली: प्रतिभा प्रकाशन.

भट्टाचार्य गदाधरः. (सन् २००१). *व्युत्पत्तिवादः* (संस्क. प्रथमो भागः). (सच्चिदान्दः मिश्रः, अनु.) वाराणसी: भारतीय विद्या प्रकाशन.

भट्टोजिदीक्षितः. (सन् २०१७). *वैयाकरणसिद्धान्तकौमुदी* (संस्क. द्वितीय). (गिरिधर शर्मा, सं.) वाराणसी: मोतीलाल बनारसीदास.

मिश्र आद्याप्रसाद. (२०४५). 'सारांश'. कौण्डभट्टः, *वैयाकरणभूषणसारः*. वाराणसी: सम्पूर्णानन्दविश्वविद्यालय.